## चतुर्विंशः पाठः

# अक्षरगीतम्

क च ट त प क च ट त प



काकः कायति का .........का...........

ख छ ठ थ फ ख छ ठ थ फ



बकः वदति आ..........आ..........

ग ज ड द ब ग ज ड द ब



व्याघ्रः गर्जति गँ..........गँ...........

घ झ ढ ध भ घ झ ढ़ ध भ



यानं चलति घँ...............घँ..............

अ इ उ ण् अ इ उ ण्



घण्टानादः टिङ्.............. टिङ्..........

ञ म ङ ण न ञ म ङ ण न



वृद्धः करोति खँ......... खँ ............. ।

**गीतं सस्वरं गायन्तु**

# अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) ——— कायति का - - का।

ख) ——— वदति आ - - आ ।

ग) ——— गर्जति गँ - - गँ।

घ) ——— चलति घँ - - घँ।

ङ) ——— करोति खँ - - खँ।

२. मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

गर्जति, वदति , कायति, चलति , बकः


३. स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭ ମିଳାଅ)

| क | ख |
|---|---|
| टिङ् टिङ् | बकः |
| घँ घँ | काकः |
| का का | व्याघ्रः |
| आ आ | यानम् |
| गँ गँ | घण्टानादः |

# बालका: आयात



बालका: आयात बालका: आयात
बालका: आयात सधीरम् ।
पंक्तिं कुरुत पंक्तिं कुरुत
पंक्तिं कुरुत सत्वरम् ।।





मण्डलं कुरुत मण्डलं कुरुत
मण्डलं कुरुत सधीरम् ।
उपरि कूर्दत उपरि कूर्दत
उपरि कूर्दत सुन्दरम् ।।

अध: उपविशत अध: उपविशत
अध: उपविशत सधीरम् ।
गीतं गायत गीतं गायत
गीतं गायत सस्वरम् ।।





मौनं तिष्ठत मौनं तिष्ठत
मौनं तिष्ठत सधीरम् ।
मन्दं हसत मन्दं हसत
मन्दं हसत सादरम् ।।

**ଶବ୍ଦାର୍ଥ:-** **आयात**- ଆସ, **सधीरम्**- ଧୀରେ, **पंक्ति**- ଧାଡ଼ି, **मण्डलं**- ବୃତ୍ତାକାର, **उपरि**- ଉପରକୁ, **कूर्दत**- ଡିଆଁ, **अध:**- ତଳେ, **उपविशत**- ବସ, **मौनं**- ଚୁପ୍, **तिष्ठत**- ରୁହ, **मन्दम्**- ଧୀରେ, **हसत**- ହସ ।

**गीतं सस्वरं गायन्तु**

# अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) मौनं ——— ।

ख) ——— गायत ।

ग) उपरि ———।

घ) बालकाः ———।

ङ) मण्डलं ———।

(गीतं, तिष्ठत, आयात, कूर्दत, कुरुत)

२. मातृभाषाया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

मौनम्, अधः, उपरि, मन्दम्, सक्षीरम्

३. स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭ ମିଳାଅ)

| क | ख |
|---|---|
| बालकाः | कूर्दत |
| उपरि | हसत |
| गीतम् | गायत |
| मन्दं | आयात |
| मण्डलं | कुरुत |

# सुभाषितानि ସୁଭାଷିତ

**दशकूपसमा वापी दशवापीसमो ह्रदः ।**
**दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ।।**

अर्थ :- एका वापी दशकूपैः समा भवति । एकः ह्रदः दशवापीभिः समः भवति ।
एकः पुत्रः दशह्रदैः समः भवति । किन्तु एकः वृक्षः दशपुत्रैः समः भवति ।

**काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।**
**देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः ।।**

अर्थ :- उचिते काले वृष्टिः भवतु । भूमिः सस्यशालिनी भवतु । देशे क्षोभः (अस्थिरता) मा भवतु । सज्जनाः निर्भयाः भवन्तु ।

**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।।**

अर्थ :- पृथिव्यां जलम् अन्नं सुभाषितं च इति त्रीणि रत्नानि सन्ति । किन्तु मूढाः जनाः पाषाणखण्डान् एव रत्नानि मन्यन्ते ।

**प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्।**
**तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ।।**

अर्थ :- जीवनस्य प्रथमे भागे भवता विद्या न सम्पादिता । द्वितीये भागे धनं न सम्पादितम् । तृतीये भागे पुण्यं न सम्पादितम्, एवं चतुर्थे भागे किं वा करिष्यति ?

**वृक्षः कल्पद्रुमः साक्षाद् जीवजगद्धिताय च ।**
**ददाति शीतलच्छायां जीवनमौषधं फलम् ।।**

अर्थ :- वृक्षः प्रत्यक्षरूपेण कल्पतरुः भवति । सः जीवस्य संसारस्य च कल्याणकरः भवति । सः शीतलां छायां, पवनम्, औषधं, फलं च ददाति ।

# अभ्यासः (ଅଭ୍ୟାସ)

## १. शून्यस्थानं पूरयतु- (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) दशकूपसमा ............... ।

(ख) .............. वर्षतु पर्जन्यः ।

(ग) सज्जनाः ................. निर्भयाः ।

(घ) पृथिव्यां ............. रत्नानि ।

(ङ) चतुर्थे किं ............. ?

(करिष्यति, त्रीणि, सन्तु, काले, वापी)

## २. पादं पूरयतु - ପାଦପୂରଣ କର।

(क) वृक्षः कल्पद्रुमः साक्षात् जीवजगद्धिताय च ।

...... ......... ...... ...... ....... ........ .......... ।

(ख) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।

...... ......... ...... ...... ....... ........ .......... ।

(ग) काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।

...... ......... ...... ...... ....... ........ .......... ।

## ३. सस्वरं गायतु । ସ୍ୱରସହିତ ଗାନ କର ।

(क) दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ।।

(ख) वृक्षः कल्पद्रुमः साक्षाद् जीवजगद्धिताय च ।
ददाति शीतलच्छायां जीवनमौषधं फलम् ।।

(ग) प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ।।



# वदतु संस्कृतम् (ସଂସ୍କୃତ କୁହନ୍ତୁ)

| | |
|---|---|
| मम नाम..... | ମୋର ନାମ...... |
| भवत: नाम किम् ? | ଆପଣଙ୍କ ନାମ କ'ଣ ? |
| भवत्या: नाम किम् ? | ଆପଣଙ୍କ ନାମ କ'ଣ ? (ସ୍ତ୍ରୀଲିଙ୍ଗ) |
| आगच्छतु। उपविशतु। | ଆସନ୍ତୁ। ବସନ୍ତୁ। |
| किं सर्वं कुशलम् ? | କ'ଣ ସବୁ ଭଲ ତ ? |
| स्वास्थ्यं कथम् अस्ति ? | ଦେହ କିପରି ଅଛି ? |
| उत्तमम् अस्ति / नास्ति। | ଭଲ ଅଛି / ନାହିଁ |
| कृपया..... ददातु। | ଦୟା କରି .... ଦିଅନ୍ତୁ। |
| स्वीकरोतु। | ଗ୍ରହଣ କରନ୍ତୁ। |
| अहम् अल्पं संस्कृतं जानामि। | ମୁଁ ଅଳ୍ପ ସଂସ୍କୃତ ଜାଣେ |
| भयं मास्तु, धैर्येण वदतु। | ଭୟ କରନ୍ତୁ ନାହିଁ , ଧୈର୍ଯ୍ୟ ସହିତ କୁହନ୍ତୁ। |